दिति चेत् व्यापकत्वाग्रहात् न च विनानुपपत्तिं सोऽपि विषयः व्यतिरेकविलयापत्तेः। अत्र प्राञ्चः यमर्थमनालम्बमानानुमितिः पक्षे साध्यसम्बन्धं विषयीकरोति स पक्षधर्मताबलात् सिद्ध्यतीति प्रतीत्यनुपपत्तिमूलकोऽन्वयी प्रतीत्यनुपपत्त्या च व्यतिरेकी तदिहानादिद्व्यणुकादिप्रवाहस्य पक्षत्वे तदुपादानस्यानादिज्ञानगोचरत्वं विनानोपादानगोचरज्ञानजन्यत्वमनादिकार्य्यप्रवाहस्यानुमितिरालम्बते अनादितैव च नित्यता सर्वमुक्तावपि तत्त्वमनादिभावत्वात् पक्षतदुपादानविषयतैव सर्वविषयता लाघवात्तु तावद्विषयकमनाद्येकमेव ज्ञानं सिद्ध्यति न तु नित्यानि नानाज्ञानानीति। नव्यास्तु अनित्यज्ञानाजन्यत्वेन पक्षविशेषणात् ज्ञानं सिध्यत् नित्यमेव सिद्ध्यति अनित्ये बाधात्। वाचस्पतिमिश्रास्तु लाघवादेकज्ञानसिद्धावुत्पत्तिमतोऽनादिकार्य्यप्रवाहं प्रत्यजनकत्वात् परिशेषेण नित्यज्ञानादिसिद्धिः नियतविषयता च ज्ञानस्य कारणाधीना कारणञ्च नित्यज्ञानान्निवर्त्तमानं नियतविषयतामादाय निवर्त्तत इति सर्वविषयत्वसिद्धिरिति। षट्पदार्थीप्रतिपादकवेदकर्तृत्वेन ईश्वरस्य षट्पदार्थीगोचरसाक्षात्कारवत्त्वेन वा सार्वज्ञ्यं घटाकाशसंयोगं प्रतीश्वरस्य कर्तृत्वात् घटादिगोचरमपि ज्ञानं सिद्धमिति केचित्। ननु घटादीनां कथमीश्वरस्य कर्तृत्वं घट ईश्वरकर्तृकः कार्य्यत्वात् क्षितिवदिति चेन्न घटस्य द्विकर्तृकतया तद्दृष्टान्तेन क्षित्यादेरपि द्विकर्तृकतापत्तेः तथा च घटवत् क्षितिः क्षितिवद्घट इतीश्वरानन्यकार्य्यकर्तृत्वेन कारणता न तु द्विकर्तृकत्वेनेति चेत् तर्हि नेश्वरकर्तृकत्वेन कारणता किन्तु कर्तृत्वेनेति मैवं ज्ञानादीनां नित्यत्वेन सर्वविषयतया घटाद्युपादानविषयत्वमपीति कथं न तेषां घटादिकारणत्वं कुलालादिज्ञानतुल्यत्वात्। तदाहुराचार्य्याः "परमाण्वदृष्टाधिष्ठातृसिद्धौ ज्ञानादीनां नित्यत्वेन सर्वविषयत्वे वेमाद्यधिष्ठानस्यापि न्यायप्राप्तत्वात् न तु तदधिष्ठानार्थमेवेश्वरसिद्धिरिति "अहं सर्वस्य प्रभवो मत्तः नर्वं प्रवर्त्तते इत्यागमाच्चायमर्थोऽव्यवसेयः। अथेश्वरस्य सर्वज्ञत्वे सर्वविषयभ्रान्तेर्ज्ञाने ईश्वरोऽपि भ्रान्तः स्यात् भ्रमस्येव तस्यापि भ्रमविषयविषयकत्वादिति चेत् रजतत्वप्रकारकज्ञानवानयमिति ज्ञानं न भ्रमः अभ्रान्तस्य तथात्वात्। इदं रजतमिति ज्ञाने रजतत्वं प्रकारः तेन स भ्रमः ईश्वरज्ञाने च रजतत्वप्रकारकत्वं प्रकार इति न भ्रमः अतएवास्मदादेरपि भ्रान्तिज्ञो न भ्रान्त इति। स्यादेतत् प्रयोजनं विना कथमीश्वरः प्रवर्त्तते? सुखस्याभावात् अधर्म्माभावेन निर्दुःखत्वात्। करुणया प्रवर्त्तते इति चेत्तर्हि परसुखदुःखप्रहाणे प्रयोजने तथा च सुखिनमेव सृजेन्न नारकिणम्। धर्माधर्मपरतन्त्रत्वात् तदनुरूपं फलं प्रापयतीति चेत्तयोरावश्यकत्वात् कर्मनिर्मितमेव जगद्वैचित्र्यमस्तु किमीश्वरेण अनपेक्षितकीटादिज्ञानवता कर्मनिरपेक्षत्वे चैकदैव सदा च सर्गप्रलयौ स्यातां ज्ञानादीनां नित्यत्वात् किञ्च तत्प्रयत्नस्य करुणाजन्यत्वेन शरीरादिजन्यतापत्तौ संसारितापत्तिः न। ईश्वरानभ्युपगमेन विचारस्याश्रयासिद्धत्वात् तमभ्युपगम्य पृच्छसि चेत् आकर्ण्य जगतएव तदिच्छाविषयत्वेन स्वेष्टसाधनताज्ञानसत्त्वात्। वस्तुतस्तु क्षित्यादितत्तदसाधारणक्रमिकादृष्टादिसामग्री ईश्वरज्ञानादयो यदा यदा भवन्ति क्षित्यादिकं करोतीति व्यवहारः सर्गप्रलयासाधारणक्रमिकादृष्टादिसामग्रीसमयवर्त्तित्वमेव तदिच्छायाश्चिकीर्षासंजिहीर्षात्वे नचैवं किञ्चिज्जन्यज्ञानादिरेति वाच्यं क्षित्यादीनां कार्य्यत्वेन ज्ञानजन्यतया नित्यज्ञानादीनामपि जनकत्वं सुखादिशब्दयोरात्माकाशादिवत्। नन्वशरीरात् कथं वेदघटादिशब्दव्यवहारसंप्रदायः। उच्यते सर्गादावदृष्टोपगृहीतभूतभेदान्मीनशरीरोत्पत्तावदृष्टवदात्मसंयोगाददृष्टसहकृतप्रयत्नवदीश्वरसंयोगाद्वा सकलवेदार्थगोचरज्ञानाद्विवक्षासहितान्मीनकलेवरकण्ठताल्वादिक्रियाजन्यसंयोगाद्वेदोत्पत्तिः। एवं कुलालादिशरीरावच्छेदेनादृष्टसहकृतप्रयत्नवदीश्वरसंयोगाच्च बुद्धीच्छासहितचेष्टोत्पत्तौ सकलघटानुकूलव्यापारो घटोत्पत्तिः। एवं प्रयोज्यप्रयोजकज्ञानाय व्यापाराभिमतशरीरावच्छेदेनापि अदृष्टसहकृतेश्वरज्ञानेच्छाप्रयत्नादेव वाग्व्यवहारः, ततस्तच्छीलो बालो व्युत्पद्यते सोऽयं भूतावेशन्यायः। यत्तु यथा शिष्यादिना मौनिश्लोकोऽनुमाय पठ्यते तथा सर्गान्तरोत्पन्नतत्त्वज्ञानवता भोगार्थं सर्गादावुत्पन्नेन मन्वादिना सर्वज्ञेन ईश्वराभिप्रायस्थवेदः साक्षात्कृत्यानूद्यते ततोऽयमसंप्रदायः स एव कायव्यूहं कृत्वा वाग्व्यवहारं करोतीति मतं तन्न प्रतिसर्गाद्यनन्तसर्वज्ञकल्पनायां गौरवात् तेषामेव क्षित्यादिकर्तृत्वसम्भवेन ईश्वरानुगमाच्च। एतेन सर्गादौ सर्गान्तरसिद्धयोगिनएव क्षितिकर्त्तारः सन्त्विति निरस्तं सर्गादावनन्तसर्वज्ञसिद्धिश्च किं प्रमाणान्तरात् क्षित्यादिकर्तृग्राहकाद्वा नाद्यस्तदभावात् नान्त्यः अनादिद्व्यणुकादिकार्य्यप्रवाहस्य सकर्तृकत्वानु-